## RAMAKRISHNA MISSION VIDYAMANDIRA

**(Residential Autonomous College affiliated to University of Calcutta)**

**B.A./B.Sc. FIFTH SEMESTER EXAMINATION, MARCH 2021**

**THIRD YEAR [BATCH 2018-21]**

**SANSKRIT (HONOURS)**

**Paper : V**

Date : 08/03/2021

Time : 11.00 am - 3.00 pm

Full Marks : 100

### Group - A

1. यथेच्छं मन्त्रद्वयस्य वङ्गानुवादः कार्यः। [2×5]

क) स नः पितेव सूनवे-
ऽग्ने सूपायनो भव।
सचस्वा नः स्वस्तये॥

ख) सं गच्छध्वं सं वदध्वं
सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे
सञ्जानाना उपासते॥

ग) जाया तप्यते कितवस्य हीना
माता पुत्रस्य चरतः क्व स्वित्।
ऋणावा बिभ्यद्धनमिच्छमानो-
ऽन्येषामस्तमुप नक्तमेति॥

घ) अहं राष्ट्री संगमनी वसूनां
चिकितुषी प्रथमा यज्ञियानाम्।
तां मा देवा व्यदधुः पुरुत्रा
भूरिस्थात्रां भूर्यावेशयन्तीम्॥

2. यथेच्छमेकस्य प्रश्नस्योत्तरं लेख्यम्। [1×10]

क) किं नाम दार्शनिकसूक्तम्? देवीसूक्ते प्रतिपादितमद्वैततत्त्वं सम्यक् विचार्य्यताम्। (2+8)

ख) अक्षसूक्ते कति देवताः स्तुताः? सूक्तेऽस्मिन् अक्षस्य निन्दा तथा कृषिकार्यस्य प्रशंसा यथा विहिता तथा समासेनोपस्थाप्यताम्। (2+8)

3. ऋष्यादिकं समुल्लिख्य यथेच्छमेको मन्त्रो व्याख्येयः। [1×6]

क) उप त्वाग्ने दिवेदिवे
दोषावस्तर्धिया वयम्।
नमो भरन्त एमसि॥

ख) य आत्मदा बलदा यस्य विश्वे

उपासते प्रशिषं यस्य देवाः।

यस्य छायामृतं यस्य मृत्युः

कस्मै देवाय हविषा विधेम॥

4. यथेच्छमेकस्य प्रश्नस्योत्तरं लेख्यम्। [1×4]

(क) व्याकरणटिप्पणीद्वयं लेख्यम्। (2+2)

पुरोहितम्, देवाँ एह, अश्नवत्, वक्षति।

(ख) याज्ञिकदिशा टीकाद्वयं विरचनीयम्। (2+2)

अनुवाक्या, ऋग्विनियोगः, ब्रह्मयज्ञः, अग्नीषोमप्रणयनम्।

(ग) यथेच्छमेकस्य विनियोगवाक्यस्याशयः स्फुटीक्रियताम्। (1×4)

i) 'अग्निमीले' इति सूक्तं प्रातरनुवाक आग्नेये क्रतौ विनियुक्तम्।

ii) वरुणप्रघासेषु कायस्य हविषो 'हिरण्यगर्भ' इत्येषा याज्या।

5. i) क) इत्यस्य मन्त्रस्य

अथवा (5)

ii) ख) इत्यस्य मन्त्रस्य पदपाठः क्रियताम्।

6. यथेच्छमेकस्योत्तरं लेख्यम्। [1×10]

क) वैदिकवाङ्मये लुङ्लकारप्रयोगमाधारीकृत्य प्रबन्धं रचयत।

ख) वैदिकवाङ्मये उपसर्गप्रयोगवैचित्र्यं स्फुटीक्रियताम्।

अथवा

ग) अधोलिखितेषु विषयद्वयमवलम्ब्य टीका लेख्या। (5+5)

इतिकरणम्, लेट्लकारः, स्वतन्त्रस्वरितः, पदपाठः।

7. वैदिकप्रयोगाणां पञ्चानां लौकिकप्रयोगाः प्रदेयाः। [5×1]

पूर्वेभिः, विश्वा, उभा, वक्षति, अश्नवत्, दाशुषे, चिकितुषी, कृणोमि, दाधार, व्योमन्।

## Group - B

8. ऋग्वेदस्य दार्शनिकसूक्तानां सोदाहरणं व्याख्या कार्या ।

अथवा [12]

कति वेदाङ्गानि ? तेषां स्वरूपं प्रयोजनं च विशदीक्रियताम् ।

9. कस्यापि **द्वयस्य** टिप्पणी कार्या । [2×5]

यजुर्वेदः ,बृहद्देवता , छान्दोग्योपनिषत् , सामवेदः

10. **अष्टानां** प्रश्नानाम् उत्तरं लेखनीयम् । [8×1]

क) वैदिकस्वराः कतिविधाः ? के च ते ?

ख) निरुक्तस्य त्रयो विभागाः के ?

ग) ऋग्वेदस्य संवादसूक्तद्वयस्य नाम लेखनीयम् ।

घ) वेदपाठस्य कति भेदाः ?

ङ) सामवेदयस्य पुरोहितः कः ?

च) ‘बालखिल्यसूक्तम्’ कस्य वेदस्य कस्मिन् मण्डले प्राप्यते ?

छ) ‘भैषज्यवेदः’ कस्य वेदस्य नामान्तरम् अस्ति ?

ज) वेदशब्दस्य कोऽर्थः ?

झ) अहं ब्रह्मास्मि इति महावाक्यस्य उत्सः कः भवति ?

ञ) शुनःशेपोपाख्यानम् कस्मिन् ब्राह्मणे प्राप्यते ?

ट) ईशोपनिषदः उत्सः कोऽस्ति ?

ठ) श्वेताश्वेतरोपनिषत् कस्मिन् वेदे अन्तर्भवति ?

11. यथेच्छ**मेकः** प्रश्नः समाधेयः। [1×10]

क) को नाम आयुर्वेदः? आयुर्वेदस्य माहात्म्यमालोच्य प्राचीनभारतवर्षे आयुर्वेदचर्चामाधारीकृत्य प्रबन्धं रचयत।

ख) प्राचीनभारतवर्षस्य गणितविद्याविषये प्रबन्धो विरचनीयः।

12. विषय**मेकम**वलम्ब्य टीका विरचनीया। [1×5]

क) आर्यभट्टः।

ख) सङ्गीतदामोदरः।

13. यथेच्छं प्रश्न**पञ्चकं** समाधेयम्। [5×1]

क) शून्यतत्त्वं केन आविष्कृतम्?

ख) अमरकोषस्य रचयिता कः?

ग) वराहमिहिररचितं ग्रन्थद्वयम् उल्लिख्यताम्।

घ) चक्रपाणिदत्तस्य प्रसिद्धग्रन्थस्य नाम किम्?

ङ) आर्यभट्टीयं केन रचितम्?

च) आसीत् चरकः कस्यावतारः?

छ) पृथिवीघूर्णनसूत्रं केन आविष्कृतम्?

ज) सङ्गीतरत्नाकरस्य रचयिता कः?

———— × ————